# dhanurveda

# ધનુર્વેદ

## Document Information

Text title : Dhanurveda, A Veda relating to the Art/Science of Archery

File name : dhanurveda.itx

Category : veda

Location : doc_veda

Transliterated by : Ravi Mahadevappa ravi at ece.neu.edu

Proofread by : Ravi Mahadevappa ravi at ece.neu.edu Assisted by Avinash Sathaye sohum at ms.uky.edu

Description-comments : The text encoded from Sanskrit text available

Latest update : March 18, 2003

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# ધનુર્વેદ

અથ ધનુર્વેદઃ
ઈશ્વરોક્તાદ્ધનુર્વેદાદ્વ્યાસસ્યાપિ સુભાષિતાત્ ।
પદાન્યાકૃષ્ય રચિતો ગ્રન્થઃ સંક્ષેપતો મયા ॥ ૧॥ 1714
વિના શાર્ઙ્ગધરં નાન્યો ધનુર્વેદાર્થતત્ત્વવિત્ ।
યતઃ સ્વપ્ને નિશિ પ્રાપ્તા શિવાત્તત્ત્વવિચારણા ॥ ૨॥ 1715
અતઃ સંદેહદોલાયાં રોપણીયં ન માનસમ્ ।
ગ્રન્થેસ્મિંશ્ચાપચતુરૈર્વીરચિન્તામણૌ ક્વચિત્ ॥ ૩॥ 1716
યસ્યાભ્યાસપ્રસાદેન નિષ્પદ્યન્તે ધનુર્ધરાઃ ।
જેતારઃ પરસૈન્યાનાં તસ્યાભ્યાસો વિધીયતામ્ ॥ ૪॥ 1717
એકોઽપિ યત્ર નગરે પ્રસિદ્ધઃ સ્યાદ્ધનુર્ધરઃ ।
તતો યાન્ત્યરયો દૂરં મૃગાઃ સિંહગૃહાદિવ ॥ ૫॥ 1718

---

અથ ધનુર્ધારણવિધિઃ
આચાર્યેણ ધનુર્દેયં બ્રાહ્મણે સુપરીક્ષિતે ।
લુબ્ધે ધૂર્તે કૃતઘ્ને ચ મન્દબુદ્ધૌ ન દીયતે ॥ ૬॥ 1719
બ્રાહ્મણાય ધનુર્દેયં ખડ્ગં વૈ ક્ષત્રિયાય ચ ।
વૈશ્યાય દાપયેત્કુન્તં ગદાં શૂદ્રસ્ય દાપયેત્ ॥ ૭॥ 1720
ધનુશ્ચક્રં ચ કુન્તં ચ ખડ્ગં ચ ચ્છુરિકા ગદા ।
સપ્તમં બાહુયુદ્ધં સ્યાદેવં યુદ્ધાનિ સપ્તધા ॥ ૮॥ 1721
આચાર્યઃ સપ્તયુદ્ધઃ સ્યાચ્ચતુર્યુદ્ધસ્તુ ભાર્ગવઃ ।
દ્વાભ્યાં ચૈવ ભવેદ્યોધ એકેન ગણકો ભવેત્ ॥ ૯॥ 1722
હસ્તઃ પુનર્વસુઃ પુષ્યો રોહિણી ચોત્તરાત્રયમ્ ।
અનુરાધાશ્વિની ચૈવ રેવતી દશમી તથા ॥ ૧૦ । 1723
જન્મસ્થે ચ તૃતીયે ચ ષષ્ઠે વૈ સપ્તમે તથા ।
દશમૈકાદશે ચન્દ્રે સર્વકર્માણિ કારયેત્ ॥ ૧૧॥ 1724

તૃતીયા પઞ્ચમી ચૈવ સપ્તમી દશમી તથા ।
ત્રયોદશી દ્વાદશી ચ તિથયસ્તુ શુભા મતાઃ ॥ ૧૨॥ 1725
સૂર્યવારઃ શુક્રવારો ગુરુવારસ્તથૈવ ચ ।
એતદ્વારત્રયં ધન્યં પ્રારમ્ભે શસ્ત્રકર્મણામ્ ॥ ૧૩॥ 1726
એભિર્દિનૈસ્તુ શિષ્યાય ગુરુઃ શસ્ત્રાણિ દાપયેત્ ।
સંતર્પ્ય દાનહોમાભ્યાં સુરાન્વેદવિધાનતઃ ॥ ૧૪॥ 1727
બ્રાહ્મણાન્ભોજયેત્તત્ર કુમારીશ્ચાપ્યનેકશઃ ।
તાપસાનર્ચયેદ્ ભક્ત્યા યે ચાન્યે શિવયોગિનઃ ॥ ૧૫॥ 1728
અન્નપાનાદિભિશ્ચૈવ વસ્ત્રાલંકારભૂષણૈઃ ।
ગન્ધમાલ્યૈર્વિચિત્રૈશ્ચ ગુરું તત્ર પ્રપૂજયેત્ ॥ ૧૬॥ 1729
કૃતોપવાસઃ શિષ્યસ્તુ મૃગાજિનપરિગ્રહઃ ।
બદ્ધાઞ્જલિપુટસ્તત્ર યાચયેદ્ગુરુતો ધનુઃ ॥ ૧૭॥ 1730
અઙ્ગન્યાસસ્તતઃ કાર્યઃ શિવોક્તઃ સિદ્ધિમિચ્છતા ।
આચાર્યેણ ચ શિષ્યસ્ય પાપઘ્નો વિઘ્નનાશનઃ ॥ ૧૮॥ 1731
શિખાસ્થાને ન્યસેદીશં બાહુયુગ્મે ચ કેશવમ્ ।
બ્રહ્માણં નાભિકૂપે તુ જઙ્ઘયોશ્ચ ગણાધિપમ્ ॥ ૧૯॥ 1732
ૐ હ્રૌં શિખાસ્થાને શંકરાય નમઃ ।
ૐ હ્રૌં બાહ્વોઃ કેશવાય નમઃ ।
ૐ હ્રૌં નાભિમધ્યે બ્રહ્મણે નમઃ ।
ૐ હ્રૌં જઙ્ઘયોર્ગણપતયે નમઃ । 1733
ઈદૃશં કારયેન્ન્યાસં યેન શ્રેયો ભવિષ્યતિ ।
અન્યેઽપિ દુષ્ટમન્ત્રેણ ન હિંસન્તિ કદાચન ॥ ૨૦ । 1734
શિષ્યાય માનુષં ચાપં ધનુર્મન્ત્રાભિમન્ત્રિતમ્ ।
કાણ્ડાત્કાણ્ડાભિમન્ત્રેણ દદ્યાદ્વેદવિધાનતઃ ॥ ૨૧॥ 1735
પ્રથમં પુષ્પવેધં ચ ફલહીનેન પત્રિણા ।
તતઃ ફલયુતેનૈવ મત્સ્યવેધં ચ કારયેત્ ॥ ૨૨॥ 1736
માંસવેધં તતઃ કુર્યાદેવં વેધો ભવેત્રિધા ।
એતૈર્વેધૈઃ કૃતૈઃ પુંસાં શરાઃ સ્યુઃ સર્વસાધકાઃ ॥ ૨૩॥ 1737
વેધને ચૈવ માંસસ્ય શરપાતો યદા ભવેત્ ।
પૂર્વદિગ્ભાગમાશ્રિત્ય તદા સ્યાદ્વિજયી સુખી ॥ ૨૪॥ 1738
દક્ષિણે કલહો ઘોરો વિદેશગમનં પુનઃ ।
પશ્ચિમે ધનધાન્યં ચ સર્વં ચૈવોત્તરે શુભમ્ ॥ ૨૫॥ 1739

ઐશાન્યાં પતનં દુષ્ટં વિદિશોઽન્યાશ્ચ શોભનાઃ ।
હર્ષપુષ્ટિકરાશ્ચૈવ સિદ્ધિદાઃ શસ્ત્રકર્મણિ ॥ ૨૬॥ 1740
એવં વેધત્રયં કુર્યાચ્છઙ્ખદુન્દુભિનિઃ સ્વનૈઃ ।
તતઃ પ્રણમ્ય ગુરવે ધનુર્બાણાન્નિવેદયેત્ ॥ ૨૭॥ 1741

---

અથ ચાપપ્રમાણમ્
પ્રથમં યૌગિકં ચાપં યુદ્ધચાપં દ્વિતીયકમ્ ।
નિજબાહુબલાન્માનાત્કિંચિદૂનં શુભં ધનુઃ ॥ ૨૮॥ 1742
વરં પ્રાણાધિકો ધન્વી ન તુ પ્રાણાધિકં ધનુઃ ।
ધનુષા પીડ્યમાનસ્તુ ધન્વી લક્ષ્યં ન પશ્યતિ ॥ ૨૯॥ 1743
અતો નિજબલોન્માનં ચાપં સ્યાચ્છુભકારકમ્ ।
દેવાનામુત્તમં ચાપં તતો ન્યૂનં ચ માનવમ્ ॥ ૩૦ । 1744
અર્ધપઞ્ચમહસ્તં તુ શ્રેષ્ઠં ચાપં પ્રકીર્તિતમ્ ।
તદ્વિજ્ઞેયં ધનુર્દિવ્યં શંકરેણ ધૃતં પુરા ॥ ૩૧॥ 1745
તસ્માત્પરશુરામેણ તતો દ્રોણેન ધારિતમ્ ।
દ્રોણાદ્ ગૃહીતં પાર્થેન તતઃ સાત્યકિના ધૃતમ્ ॥ ૩૨॥ 1746
કૃતે યુગે મહાદેવસ્ત્રેતાયાં ચાપિ રાઘવઃ ।
દ્વાપરે દ્રોણવિપ્રશ્ચ દૈવં ચાપમધારયત્ ॥ ૩૩॥ 1747
ચતુર્વિંશાઙ્ગુલો હસ્તશ્ચતુર્હસ્તં ધનુઃ સ્મૃતમ્ ।
તદ્ભવેન્માનવં ચાપં સર્વલક્ષણસંયુતમ્ ॥ ૩૪॥ 1748
ત્રિપર્વ પઞ્ચપર્વ ચ સપ્તપર્વ પ્રકીર્તિતમ્ ।
નવપર્વ ચ કોદણ્ડં ચતુર્ધા શુભકારકમ્ ॥ ૩૫॥ 1749
ચતુઃપર્વ ચ ષટ્પર્વ અષ્ટપર્વ વિવર્જયેત્ ।
કેષાંચિચ્ચ ભવેચ્ચાપં વિતસ્તિનવસંમિતમ્ ॥ ૩૬॥ 1750
અતિજીર્ણમપક્વં ચ જ્ઞાતિધૃષ્ટં તથૈવ ચ ।
દગ્ધં છિદ્રં ન કર્તવ્યં બાહ્યાભ્યન્તરહસ્તકમ્ ॥ ૩૭॥ 1751
ગુણહીનં ગુણાક્રાન્તં કાણ્ડદોષસમન્વિતમ્ ।
ગલગ્રન્થિ ન કર્તવ્યં તલમધ્યે તથૈવ ચ ॥ ૩૮॥ 1752
અપક્વં ભઙ્ગમાયાતિ અતિજીર્ણં તુ કર્કશમ્ ।
જ્ઞાતિધૃષ્ટં તુ સોદ્વેગં કલહો બાન્ધવૈઃ સહ ॥ ૩૯॥ 1753
દગ્ધેન દહ્યતે વેશ્મ છિદ્રં યુદ્ધવિનાશનમ્ ।

બાહ્યે લક્ષ્યં ન લભ્યેત તથૈવાભ્યન્તરેપિ વા ॥ ૪૦ । 1754
હીને તુ સંધિતે બાણે સંગ્રામે ભઙ્ગકારકમ્ ।
આક્રાન્તે તુ પુનઃ ક્વાપિ ન લક્ષ્યં પ્રાપ્યતે દૃઢમ્ ॥ ૪૧॥ 1755
ગલગ્રન્થિ તલગ્રન્થિ ધનહાનિકરં ધનુઃ ।
એભિર્દોષૈર્વિનિર્મુક્તં સર્વકાર્યકરં સ્મૃતમ્ ॥ ૪૨॥ 1756
શાર્ઙ્ગ પુનર્ધનુર્દિવ્યં વિષ્ણોઃ પરમમાયુધમ્ ।
વિતસ્તિસપ્તસંમાનં નિર્મિતં વિશ્વકર્મણા ॥ ૪૩॥ 1757
ન ચ સ્વર્ગે ન પાતાલે ન ભૂમૌ કસ્યચિત્કરે ।
તદ્ધનુર્વશમાયાતિ મુક્ત્વૈકં પુરુષોત્તમમ્ ॥ ૪૪॥ 1758
પૌરુષેયં તુ યચ્છાર્ઙ્ગ બહુવત્સરશોષિતમ્ ।
વિતસ્તિભિઃ સાર્ધષડ્ભિર્મિતં સર્વાર્થસાધનમ્ ॥ ૪૫॥ 1759
પ્રાયો યોગ્યં ધનુઃ શાર્ઙ્ગ ગજારોહાશ્વસાદિનામ્ ।
રથિનાં ચ પદાતીનાં વાંશં ચાપં પ્રકીર્તિતમ્ ॥ ૪૬॥ 1760

---

અથ ગુણલક્ષણાનિ

ગુણાનાં લક્ષણં વક્ષ્યે યાદૃશં કારયેદ્ગુણમ્ ।
પટ્ટસૂત્રો ગુણઃ કાર્યઃ કનિષ્ઠામાનસંમિતઃ ॥ ૪૭॥ 1761
ધનુઃપ્રમાણો નિઃસન્ધિઃ શુદ્ધૈસ્ત્રિગુણતન્તુભિઃ ।
વર્તિતઃ સ્યાદ્ગુણઃ શ્લક્ષ્ણઃ સર્વકર્મસહો યુધિ ॥ ૪૮॥ 1762
અભાવે પટ્ટસૂત્રસ્ય હારિણી સ્નાયુરિષ્યતે ।
ગુણાર્થમથવા ગ્રાહ્યાઃ સ્નાયવો મહિષીગવામ્ ॥ ૪૯॥ 1763
તત્કાલહતગોકર્ણચર્મણા છાગલેન વા ।
નિર્લોમ્ના તન્તુરૂપેણ કુર્યાદ્વા ગુણમુત્તમમ્ ॥ ૫૦ । 1764
પક્વવંશત્વચા કાર્યો ગુણસ્તુ સ્થાવરો દૃઢઃ ।
પટ્ટસૂત્રેણ સંનદ્ધઃ સર્વકર્મસહો યુધિ ॥ ૫૧॥ 1765
પ્રાપ્તે ભાદ્રપદે માસિ ત્વગર્કસ્ય પ્રશસ્યતે ।
તસ્યાસ્તત્ર ગુણઃ કાર્યઃ પવિત્રઃ સ્થાવરો દૃઢઃ ॥ ૫૨॥ 1766
વૃત્તાર્કસૂત્રતન્તૂનાં હસ્તાસ્ત્વષ્ટાદશ સ્મૃતાઃ ।
સદ્વૃત્તં ત્રિગુણં કાર્યં પ્રમાણોઽયં ગુણે સ્મૃતઃ ॥ ૫૩॥ 1767

---

અથ શરલક્ષણાનિ

અતઃ પરં પ્રવક્ષ્યામિ શરાણાં લક્ષણં શુભમ્ ।
સ્થૂલં ન ચાતિસૂક્ષ્મં ચ ન પક્વં ન કુભૂમિજમ્ ।
હીનગ્રન્થિવિદીર્ણં ચ વર્જયેદીદૃશં શરમ્ ॥ ૫૪॥ 1768
પૂર્ણગ્રન્થિ સુપક્વં ચ પાણ્ડુરં સમયાહૃતમ્ ।
કઠિનં વર્તુલં કાણ્ડં ગૃહ્ણીયાત્સુપ્રદેશજમ્ ॥ ૫૫॥ 1769
દ્વૌ હસ્તૌ મુષ્ટિહીનૌ તુ દૈર્ઘ્યે સ્થૌલ્યે કનિષ્ઠિકા ।
વિધેયા શરમાનેષુ યન્ત્રેષ્વાકર્ષયેત્તતઃ ॥ ૫૬॥ 1770
કઙ્કહંસશશાદાનાં મત્સ્યાદક્રૌઞ્ચકેકિનામ્ ।
ગૃધ્રાણાં કુક્કુટાનાં ચ પક્ષા એતેષુ શોભનાઃ ॥ ૫૭॥ 1771
એકૈકસ્ય શરસ્યૈવ ચતુષ્પક્ષાણિ યોજયેત્ ।
ષડઙ્ગુલપ્રમાણેન પક્ષચ્છેદં ચ કારયેત્ ॥ ૫૮॥ 1772
દશાઙ્ગુલમિતાઃ પક્ષાઃ શાર્ઙ્ગચાપસ્ય માર્ગણે ।
યોજ્યા દૃઢાશ્ચતુઃસંખ્યાઃ સંનદ્ધાઃ સ્નાયુતન્તુભિઃ ॥ ૫૯॥ 1773
શરાશ્ચ ત્રિવિધા જ્ઞેયાઃ સ્ત્રી પુમાંશ્ચ નપુંસકઃ ।
અગ્રે સ્થૂલો ભવેન્નારી પશ્ચાત્સ્થૂલો ભવેત્પુમાન્ ॥ ૬૦॥ 1774
સમં નપુંસકં જ્ઞેયં તલ્લક્ષ્યાર્થં પ્રશસ્યતે ।
દૂરાપાતં યુવત્યા ચ પુરુષો ભેદયેદ્ દૃઢમ્ ॥ ૬૧॥ 1775

---

અથ ફલલક્ષણાનિ

ફલં તુ શુદ્ધલોહસ્ય સુધારં તીક્ષ્ણમક્ષતમ્ ।
યોજયેદ્વજ્રલેપેન શરે પક્ષાનુમાનતઃ ॥ ૬૨॥ 1776
આરામુખં ક્ષુરપ્રં ચ ગોપુચ્છં ચાર્ધચન્દ્રકમ્ ।
સૂચિમુખં ચ ભલ્લં ચ વત્સદન્તં દ્વિભલ્લકમ્ ॥ ૬૩॥ 1777
કર્ણિકં કાકતુણ્ડં ચ તથાન્યાન્યપ્યનેકશઃ ।
ફલાનિ દેશભેદેષુ ભવન્તિ બહુરૂપતઃ ॥ ૬૪॥ 1778
આરામુખેન વૈ ચર્મ ક્ષુરપ્રેણ ચ કાર્મુકમ્ ।
સૂચીમુખેન કવચમર્ધચન્દ્રેણ મસ્તકમ્ ॥ ૬૫॥ 1779
ભલ્લેન હૃદયં વેધ્યં દ્વિભલ્લેન ગુણઃ શરઃ ।
લોહં ચ કાકતુણ્ડેન લક્ષ્યં ગોપુચ્છકેન ચ ॥ ૬૬॥ 1780
અન્યદ્ગોપુચ્છકં જ્ઞેયં શુદ્ધકાષ્ઠવિનિર્મિતમ્ ।
મુખે ચ લોહકણ્ટેન વેધ્યં ત્ર્યઙ્ગુલસંમિતમ્ ॥ ૬૭॥ 1781

અથ ફલપાયનમ્

ફલસ્ય પાયનં વક્ષ્યે દિવ્યૌષધિવિલેપનૈઃ ।
યેન દુર્ભેદ્યવર્માણિ ભેદયેત્તરુપર્ણવત્ ॥ ૬૮॥ 1782
પિપ્પલી સૈન્ધવં કુષ્ઠં ગોમૂત્રેણ તુ પેષયેત્ ।
અનેન લેપયેચ્છસ્ત્રં લિપ્તં ચાગ્નૌ પ્રતાપયેત્ ॥ ૬૯॥ 1783
અવિશીતમનાવિદ્ધં પીતનષ્ટં તથૌષધમ્ ।
તતો નિર્વાપિતં તૈલે લોહં તત્ર વિશિષ્યતે ॥ ૭૦॥ 1784
પઞ્ચભિર્લવણૈઃ પિષ્ટૈર્મધુસિક્તૈઃ સસર્ષપૈઃ ।
એભિઃ પ્રલેપયેચ્છસ્ત્રં લિપ્તં ચાગ્નૌ પ્રતાપયેત્ ॥ ૭૧॥ 1785
શિખિગ્રીવાનુવર્ણાભં તપ્તપીતં તથૌષધમ્ ।
તતસ્તુ વિમલં તોયં પાયયેચ્છસ્ત્રમુત્તમમ્ ॥ ૭૨॥ 1786

અથ નારાચનાલીકૌ

સર્વલોહાસ્તુ યે બાણા નારાચાસ્તે પ્રકીર્તિતાઃ ।
પઞ્ચભિઃ પૃથુલૈઃ પક્ષૈર્યુક્તાઃ સિદ્ધ્યન્તિ કસ્યચિત્ ॥ ૭૩॥ 1787
નાલીકા લઘવો બાણા તલયન્ત્રેણ ચોદિતાઃ ।
અત્યુચ્ચદૂરપાતેષુ દુર્ગયુદ્ધેષુ તે મતાઃ ॥ ૭૪॥ 1788

અથ સ્થાનમુષ્ટયાકર્ષણલક્ષણાનિ

સ્થાનાન્યષ્ટૌ વિધેયાનિ યોજને ભિન્નકર્મણામ્ ।
મુષ્ટયઃ પઞ્ચ સમાખ્યાતા વ્યાયાઃ પઞ્ચ પ્રકીર્તિતા ॥ ૭૫॥ 1789
અગ્રતો વામપાદં ચ દક્ષિણં જાનુ કુઞ્ચિતમ્ ।
આલીઢં તુ પ્રકર્તવ્યં હસ્તદ્વયસવિસ્તરમ્ ॥ ૭૬॥ 1790
પ્રત્યાલીઢં તુ કર્તવ્યં સવ્યં ચેવાનુકુઞ્ચિતમ્ ।
દક્ષિણં ચ પુરસ્તદ્વદ્દૂરપાતે વિશિષ્યતે ॥ ૭૭॥ 1791
પાદૌ સુવિસ્તરૌ કાર્યૌ સમૌ હસ્તપ્રમાણતઃ ।
વિશાખસ્થાનકં જ્ઞેયં કૂટલક્ષ્યસ્ય વેધને ॥ ૭૮॥ 1792
સમપાદે સમૌ પાદૌ નિષ્કમ્પૌ ચ સુસંગતૌ ।
અસમે ચ પુરો વામો હસ્તમાત્રે નતં વપુઃ ॥ ૭૯॥ 1793
આકુઞ્ચિતોરૂ દ્વૌ યત્ર જાનુભ્યાં ધરણિં ગતૌ ।

દર્દુરક્રમમિત્યાહુઃ સ્થાનકં દૃઢભેદને ॥ ૮૦॥ 1794
સવ્યં જાનુ ગતં ભૂમૌ દક્ષિણં ચ સકુઞ્ચિતમ્ ।
અગ્રતો યત્ર વાતવ્યં તં વિદ્યાદ્ગરુડક્રમમ્ ॥ ૮૧॥ 1795
પદ્માસનં પ્રસિદ્ધં તુ ઉપવિશ્ય યથાક્રમમ્ ।
ધન્વિનાં તત્તુ વિજ્ઞેયં સ્થાનકં શુભલક્ષણમ્ ॥ ૮૨॥ 1796

---

અથ ગુણમુષ્ટયઃ

પતાકા વજ્રમુષ્ટિશ્ચ સિંહકર્ણી તથૈવ ચ ।
મત્સરી કાકતુણ્ડી ચ યોજનીયા યથાક્રમમ્ ॥ ૮૩॥ 1797
દીર્ઘા તુ તર્જની યત્ર આશ્રિતાઙ્ગુષ્ઠમૂલકમ્ ।
પતાકા સા ચ વિજ્ઞેયા નલિકા દૂરમોક્ષણે ॥ ૮૪॥ 1798
તર્જની મધ્યમામધ્યમઙ્ગુષ્ઠો વિશતે યદિ ।
વજ્રમુષ્ટિસ્તુ સા જ્ઞેયા સ્થૂલે નારાચમોક્ષણે ॥ ૮૫॥ 1799
અઙ્ગુષ્ઠનખમૂલે તુ તર્જન્યગ્રં સુસંસ્થિતમ્ ।
મત્સરી સા ચ વિજ્ઞેયા ચિત્રલક્ષ્યસ્ય વેધને ॥ ૮૬॥ 1800
અઙ્ગુષ્ઠાગ્રે તુ તર્જન્યા મુખં યત્ર નિવેશિતમ્ ।
કાકતુણ્ડી ચ વિજ્ઞેયા સૂક્ષ્મલક્ષ્યેષુ યોજિતા ॥ ૮૭॥ 1801

---

અથ ધનુર્મુષ્ટિસંધાનમ્

સંધાનં ત્રિવિધં પ્રોક્તમધ ઊર્ધ્વં સમં તથા ।
યોજયેત્ ત્રિપ્રકારં હિ કાર્યેષ્વપિ યથાક્રમમ્ ॥ ૮૮॥ 1802
અધશ્ચ દૂરપાતિત્વં સમે લક્ષ્યં સુનિશ્ચિતમ્ ।
દૃઢસ્ફોટં પ્રકુર્વીત ઊર્ધ્વસંસ્થાનયોગતઃ ॥ ૮૯॥ 1803

---

અથ વ્યાયાઃ

કૈશિકઃ કેશમૂલે ચેચ્છરઃ શ‍ૃઙ્ગે ચ સાત્ત્વિકઃ ।
શ્રવણે વત્સકર્ણશ્ચ ગ્રીવાયાં ભરતો ભવેત્ ॥ ૯૦॥ 1804
અંસકે સ્કન્ધનામા ચ વ્યાયાઃ પઞ્ચ પ્રકીર્તિતાઃ ।
કૈશિકશ્ચિત્રયુદ્ધેષુ અધોલક્ષ્યેષુ સાત્ત્વિકઃ ॥ ૯૧॥ 1805
વત્સકર્ણઃ સ વિજ્ઞેયો ભરતો દૃઢભેદને ।
દૃઢભેદે ચ દૂરે ચ સ્કન્ધનામાનમુદ્દિશેત્ ॥ ૯૨॥ 1806

અથ લક્ષ્યમ્
લક્ષ્યં ચતુર્વિધં જ્ઞેયં સ્થિરં ચૈવ ચલં તથા ।
વેધયેત્રિપ્રકારં તુ સ્થિરવેધી સ ઉચ્યતે ॥ ૯૩॥ 1807
આત્માનં સુસ્થિરં કૃત્વા લક્ષ્યં ચૈવ સ્થિરં બુધઃ ।
વેધયેત્ ત્રિપ્રકારં તુ સ્થિરવેધી સ ઉચ્યતે ॥ ૯૪॥ 1808
ચલં તુ વેધયેદ્યસ્તુ આત્મના સ્થિરસંસ્થિતઃ ।
ચલલક્ષ્યં તુ તત્પ્રોક્તમાચાર્યેણ સુધીમતા ॥ ૯૫॥ 1809
ધન્વી તુ ચલતે યત્ર સ્થિરલક્ષ્યે સમાહિતઃ ।
ચલાચલં ભવેત્તત્ર અપ્રમેયમનિન્દિતમ્ ॥ ૯૬॥ 1810
ઉભાવેવ ચલૌ યત્ર લક્ષ્યં ચાપિ ધનુર્ધરઃ ।
તદ્દ્વિજ્ઞેયં દ્વયચલં શ્રમેણૈવ હિ સાધ્યતે ॥ ૯૭॥ 1811
શ્રમેણાસ્ખલિતં લક્ષ્યં દૂરં ચ બહુભેદનમ્ ।
શ્રમેણ કઠિના મુષ્ટિઃ શીઘ્રસંધાનમાપ્યતે ॥ ૯૮॥ 1812
શ્રમેણ ચિત્રયોધિત્વં શ્રમેણ પ્રાપ્યતે જયઃ ।
તસ્માદ્ગુરુસમક્ષં હિ શ્રમઃ કાર્યો વિજાનતા ॥ ૯૯॥ 1813
પ્રથમં વામહસ્તેન યઃ શ્રમં કુરુતે નરઃ ।
તસ્ય ચાપક્રિયાસિદ્ધિરચિરાદેવ જાયતે ॥ ૧૦૦॥ 1814
વામહસ્તે તુ સંસિદ્ધે પશ્ચાદ્દક્ષિણમારભેત્ ।
ઉભાભ્યાં ચ શ્રમં કુર્યાન્નારાચૈશ્ચ શરૈસ્તથા ॥ ૧૦૧॥ 1815
વામેનૈવ શ્રમં કુર્યાત્સુસિદ્ધે દક્ષિણે કરે ।
વિશાખેનાસમેનૈવ તથા વ્યાયે ચ કૈશિકે ॥ ૧૦૨॥ 1816
ઉદિતે ભાસ્કરે લક્ષ્યં પશ્ચિમાયાં નિવેશયેત્ ।
અપરાહ્ને ચ કર્તવ્યં લક્ષ્યં પૂર્વદિગાશ્રિતમ્ ॥ ૧૦૩॥ 1817
ઉત્તરેણ સદા કાર્યં પ્રાણસ્ય ન વિરોધકમ્ ।
સંગ્રામેણ વિના કાર્યં ન લક્ષ્યં દક્ષિણામુખમ્ ॥ ૧૦૪॥ 1818
ષષ્ટિધન્વન્તરે લક્ષ્યં જ્યેષ્ઠલક્ષ્યં પ્રકીર્તિતમ્ ।
ચત્વારિંશન્મધ્યમં ચ વિંશતિશ્ચ કનિષ્ઠકમ્ ॥ ૧૦૫॥ 1819
શરાણાં કથિતં હ્યેતન્નારાચાનામથોચ્યતે ।
ચત્વારિંશચ્ચ ત્રિંશચ્ચ ષોડશૈવ ભવેત્તતઃ ॥ ૧૦૬॥ 1820
ચતુઃશતૈશ્ચ કાણ્ડાનાં યો હિ લક્ષ્યં વિસર્જયેત્ ।

સૂર્યોદયે ચાસ્તમયે સ જ્યેષ્ઠો ધન્વિનાં ભવેત્ ॥ ૧૦૭॥ 1821
ત્રિશતૈર્મધ્યમશ્ચૈવ દ્વિશતાભ્યાં કનિષ્ઠકઃ ।
લક્ષ્યં ચ પુરુષોન્માનં કુર્યાચ્ચન્દ્રકસંયુતમ્ ॥ ૧૦૮॥ 1822
ઊર્ધ્વવેદી ભવેજ્જયેષ્ઠો નાભિવેધી ચ મધ્યમઃ ।
યઃ પાદવેધી લક્ષ્યસ્ય સ કનિષ્ઠો મતો મયા ॥ ૧૦૯॥ 1823

---

અથાનધ્યાયઃ

અષ્ટમી ચ અમાવાસ્યા વર્જનીયા ચતુર્દશી ।
પૂર્ણિમાર્ધદિનં યાવન્નિષિદ્ધા સર્વકર્મસુ ॥ ૧૧૦॥ 1824
અકાલે ગર્જિને દેવે દુર્દિનં વાથવા ભવેત્ ।
પૂર્વકાણ્ડહતં લક્ષ્યમનધ્યાયં પ્રચક્ષતે ॥ ૧૧૧॥ 1825
શ્રમં ચ કુર્વતસ્તત્ર ભુજંગો યદિ દૃશ્યતે ।
અથવા ભજ્યતે ચાપં યદૈવ શ્રમકર્મણિ ॥ ૧૧૨॥ 1826
ત્રુટ્યતે વા ગુણો યત્ર પ્રથમે બાણમોક્ષણે ।
શ્રમં તત્ર ન કુર્વીત શસ્ત્રે મતિમતાં વરઃ ॥ ૧૧૩॥ 1827

---

અથ શ્રમક્રિયા

ક્રિયાકલાપાન્વક્ષ્યામિ શ્રમસાધ્યાઞ્શુચિષ્મતામ્ ।
યેષાં વિજ્ઞાનમાત્રેણ સિદ્ધિર્ભવતિ નાન્યથા ॥ ૧૧૪॥ 1828
પ્રથમં ચાપમારોપ્ય ચૂલિકાં બન્ધયેત્તતઃ ।
સ્થાનકં તુ તતઃ કૃત્વા બાણોપરિ કરં ન્યસેત્ ॥ ૧૧૫॥ 1829
તુલનં ધનુષશ્ચૈવ કર્તવ્યં વામપાણિના ।
આદાનં ચ તતઃ કૃત્વા સંધાનં ચ તતઃ પરમ્ ॥ ૧૧૬॥ 1830
સકૃદાકૃષ્ટચાપેન ભૂમિવેધં તુ કારયેત્ ।
નમસ્કુર્યાચ્છિવં વિઘ્નરાજં ગુરુધનુઃશરાન્ ॥ ૧૧૭॥ 1831
યાચિતવ્યા ગુરોરાજ્ઞા બાણસ્યાકર્ષણં પ્રતિ ।
પ્રાણવાયું પ્રયત્નેન બાણેન સહ પૂરયેત્ ॥ ૧૧૮॥ 1832
કુમ્ભકેન સ્થિરં કૃત્વા હુંકારેણ વિસર્જયેત્ ।
ઇત્યભ્યાસક્રિયા કાર્યા ધન્વિના સિદ્ધિમિચ્છતા ॥ ૧૧૯॥ 1833
ષણ્માસાત્સિદ્ધ્યતે મુષ્ટિઃ શરાઃ સંવત્સરેણ તુ ।
નારાચાસ્તસ્ય સિદ્ધ્યન્તિ યસ્ય તુષ્ટો મહેશ્વરઃ ॥ ૧૨૦॥ 1834

પુષ્પવદ્ધારયેદ્ બાણં સર્પવત્પીડયેદ્ધનુઃ ।
ધનવચ્ચિન્તયેલ્લક્ષ્યં યદીચ્છેત્સિદ્ધિમાત્મનઃ ॥ ૧૨૧॥ 1835
ક્રિયામિચ્છન્તિ આચાર્યા દૂરમિચ્છન્તિ ભાર્ગવાઃ ।
રાજાનો દૃષ્ટિમિચ્છન્તિ લક્ષ્યમિચ્છન્તિ ચેતરે ॥ ૧૨૨॥ 1836
જનાનાં રઞ્જનં યેન લક્ષ્યઘાતાત્પ્રજાયતે ।
હીનેનાપીષુણા તસ્માત્પ્રશસ્તં લક્ષ્યવેધનમ્ ॥ ૧૨૩॥ 1837
વિશાખસ્થાનકે સ્થિત્વા સમસંધાનમાચરેત્ ।
ગોપુચ્છમુખબાણેન સિંહકર્ણ્યા ચ મુષ્ટિના ॥ ૧૨૪॥ 1838
આકર્ષેત્કૈશિકવ્યાયે ન શિખાં ચાલયેત્તતઃ ।
પૂર્વાપરૌ સમૌ કાર્યૌ સમાંસૌ નિશ્ચલૌ કરૌ ॥ ૧૨૫॥ 1839
ચક્ષુષી સ્પન્દયેન્નૈવ દૃષ્ટિં લક્ષ્યે નિયોજયેત્ ।
મુષ્ટિનાચ્છાદિતં લક્ષ્યં શરસ્યાગ્રે નિયોજયેત્ ॥ ૧૨૬॥ 1840
મનો દૃષ્ટિગતં જ્ઞાત્વા તતઃ કાણ્ડં વિસર્જયેત્ ।
સ્ખલત્યેવં કદાચિન્ન લક્ષ્યે યોધો જિતશ્રમઃ ॥ ૧૨૭॥ 1841
આદાનં ચૈવ તૂણીરાત્સંધાનં કર્ષણં તથા ।
ક્ષેપણં ચ ત્વરાયુક્તો બાણસ્ય કુરુતે તુ યઃ । 1842
નિત્યાભ્યાસવશાત્તસ્ય શીઘ્રસંધાનતા ભવેત્ ॥ ૧૨૮। ।
પ્રત્યાલીઢે કૃતે સ્થાને અધઃસંધાનમાચરેત્ ।
મુષ્ટ્યા પતાકયા બાણં સ્ત્રીચિહ્નં દૂરપાતનમ્ ॥ ૧૨૯॥ 1843
દર્દુરક્રમમાસ્થાય ઊર્ધ્વસંધાનમાચરેત્ ।
સ્કન્ધવ્યાયેન વજ્રસ્ય મુષ્ટ્યા પુંમાર્ગણેન ચ । 1844
અત્યન્તસૌષ્ઠવાદ્બાહ્વોર્જાયતે દૃઢવેધિતા ॥ ૧૩૦। ।
સૂચીમુખા મીનપુચ્છા ભ્રમરી ચ તૃતીયકા ।
શરાણાં ગતયસ્તિસ્રઃ પ્રશસ્તાઃ કથિતા બુધૈઃ ॥ ૧૩૧॥ 1845
સૂચીમુખગતિસ્તસ્ય સાયકસ્ય પ્રજાયતે ।
પત્રં વિલોમિતં યસ્ય અથવા હીનપત્રકમ્ ॥ ૧૩૨॥ 1846
કર્કશેન તુ ચાપેન યઃ કૃષ્ટો હીનમુષ્ટિના ।
મત્સ્યપુચ્છા ગતિસ્તસ્ય સાયકસ્ય પ્રકીર્તિતા ॥ ૧૩૩॥ 1847
ભ્રમરી કથિતા હ્યેષા વિદ્વદ્ભિઃ શ્રમકર્મણિ ।
ઋજુત્વેન વિના યાતિ ક્ષેપ્યમાણસ્તુ સાયકઃ ॥ ૧૩૪॥ 1848
વામગા દક્ષગા ચૈવ ઊર્ધ્વગાધોગમા તથા ।
ચતસ્રો ગતયઃ પ્રોક્તા બાણસ્ખલનહેતવઃ ॥ ૧૩૫॥ 1849

કમ્પતે ગુણમુષ્ટિસ્તુ માર્ગણસ્ય હિ પૃષ્ઠતઃ ।
સંમુખી સ્યાદ્ધનુર્મુષ્ઠિસ્તદા વામે ગતિર્ભવેત્ ॥ ૧૩૬॥ 1850
ગ્રહણં શિથિલં યસ્ય ઋજુત્વેન વિસર્જિતમ્ ।
પાર્શ્વં તુ દક્ષિણં યાતિ સાયકસ્ય ન સંશયઃ ॥ ૧૩૭॥ 1851
ઊર્ધ્વં યાતિ ચાપમુષ્ટિર્ગુણમુષ્ટિરધો ભવેત્ ।
સ મુક્તો માર્ગણો લક્ષ્યાદૂરં યાતિ ન સંશયઃ ॥ ૧૩૮॥ 1852
મોક્ષણે ચૈવ બાણસ્ય ચાપમુષ્ટિરધો ભવેત્ ।
ગુણમુષ્ટિર્ભવેદૂર્ધ્વં તદાધોગામિની ગતિઃ ॥ ૧૩૯॥ 1853
લક્ષ્યબાણાગ્રદૃષ્ટીનાં સંગતિસ્તુ યદા ભવેત્ ।
તદાનીમુજ્ઝિતો બાણો લક્ષ્યાન્ન સ્ખલતિ ધ્રુવમ્ ॥ ૧૪૦॥ 1854
નિર્દોષઃ શબ્દહીનશ્ચ સમમુષ્ટિદ્વયોજ્ઝિતઃ ।
ભિનત્તિ દૃઢવેધ્યાનિ સાયકો નાસ્તિ સંશયઃ ॥ ૧૪૧॥ 1855
સ્વાકૃષ્ટસ્તેજિતો યશ્ચ સુશુદ્ધો ગાઢમુક્તિતઃ ।
નરનાગાશ્વકાયેષુ ન સ તિષ્ઠતિ માર્ગણઃ ॥ ૧૪૨॥ 1856
યસ્ય તૃણસમા બાણા યસ્યેન્ધનસમં ધનુઃ ।
યસ્ય પ્રાણસમા મૌર્વી સ ધન્વી ધન્વિનાં વરઃ ॥ ૧૪૩॥ 1857
અયશ્ચર્મ ઘતશ્ચૈવ મૃત્પિણ્ડં ચ ચતુષ્ટયમ્ ।
યો ભિનત્તિ હિ તસ્યેષુર્વજ્રેણાપિ ન ધાર્યતે ॥ ૧૪૪॥ 1858
સાર્ધાઙ્ગુલપ્રમાણેન લોહપાત્રાણિ કારયેત્ ।
તાનિ ભિત્ત્વૈકબાણેન દૃઢઘાતી ભવેન્નરઃ ॥ ૧૪૫॥ 1859
ચતુર્વિંશતિચર્માણિ ભિનત્ત્યેકેષુણા નરઃ ।
તસ્ય બાણો ગજેન્દ્રસ્ય કાયં નિર્ભિદ્ય ગચ્છતિ ॥ ૧૪૬॥ 1860
ભ્રામ્યજ્જલે ઘટો વેદ્ધ્યશ્ચક્રે મૃત્પિણ્ડકં તથા ।
ભ્રમન્તં વેધયેદ્યસ્તુ દૃઢભેદી સ ઉચ્યતે ॥ ૧૪૭॥ 1861
અયસ્તુ કાકતુણ્ડેન ચર્મ આરામુખેન હિ ।
મૃત્પિણ્ડં ચ ઘટં ચૈવ વિધ્યેત્સૂચિમુખેન હિ ॥ ૧૪૮॥ 1862
બાણભઙ્ગં કરાવર્તં કાષ્ઠચ્છેદનમેવ ચ ।
બિન્દુકં ગોલકયુગં યો વેત્તિ સ જયી ભવેત્ ॥ ૧૪૯॥ 1863
લક્ષ્યસ્થાને ધૃતં કાણ્ડં સસુખં છેદયેત્તતઃ ।
કિંચિન્મુષ્ટિં વિધાય સ્વાં તિર્યગ્વિફલિકેષુણા ॥ ૧૫૦॥ 1864
સંમુખં વા સમાયાન્તં તિર્યક્છાયં તમમ્બરે ।
શરં શરેણ યશ્છિન્દ્યાદ્બાણચ્છેદી સ જાયતે ॥ ૧૫૧॥ 1865

કાષ્ઠેઽશ્વકેશં સંયમ્ય તત્ર બદ્ધ્વા વરાટિકામ્ ।
હસ્તેન ભ્રામ્યમાણાં ચ યો હન્તિ સ ધનુર્ધરઃ ॥ ૧૫૨॥ 1866
લક્ષ્યસ્થાને ન્યસેત્કાષ્ઠં સાર્દ્રં ગોપુચ્છસંનિભમ્ ।
યશ્છિન્દ્યાત્તં ક્ષુરપ્રેણ કાષ્ઠચ્છેત્તા સ જાયતે ॥ ૧૫૩॥ 1867
લક્ષ્યે બિન્દું ન્યસેચ્છુભ્રં શુભ્રબન્ધૂકપુષ્પવત્ ।
હન્તિ તં બિન્દુકં યસ્તુ ચિત્રયોધી સ જાયતે ॥ ૧૫૪॥ 1868
કાષ્ઠગોલયુગં ક્ષિપ્તં દૂરમૂર્ધ્વપુરઃસ્થિતૈઃ ।
અપ્રાપ્તધારં પૃષ્ઠેન ગચ્છેત્પુચ્છમુખેન હિ ॥ ૧૫૫॥ 1869
યો હન્તિ શરયુગ્મેન શીઘ્રસંધાનયોગતઃ ।
સ સ્યાદ્ધનુર્ભૃતાં શ્રેષ્ઠઃ પૂજિતઃ સર્વપાર્થિવૈઃ ॥ ૧૫૬॥ 1870
રથસ્થેન ગજસ્થેન હયસ્થેન ચ પત્તિના ।
ધાવતા વૈ શ્રમઃ કાર્યો લક્ષ્યં હન્તું સુનિશ્ચિતમ્ ॥ ૧૫૭॥ 1871
લક્ષ્યસ્થાને ન્યસેત્કાંસ્યપાત્રં હસ્તદ્વયાન્તરે ।
તાડયેચ્છર્કરાભિસ્તચ્છબ્દઃ સંજાયતે યથા ॥ ૧૫૮॥ 1872
યત્રૈવોત્પદ્યતે શબ્દસ્તં સમ્યક્તત્ર ચિન્તયેત્ ।
કર્ણેન્દ્રિયમનોયોગાલ્લક્ષ્યંનિશ્ચયતાં નયેત્ ॥ ૧૫૯॥ 1873
પુનઃ શર્કરયા તચ્ચ તાડયેચ્છબ્દહેતવે ।
પુનર્નિશ્ચયતાં નેયં શબ્દસ્થાનાનુસારતઃ ॥ ૧૬૦॥ 1874
તતઃ કિંચિત્કૃતં દૂરે નિત્યં નિત્યં વિધાનતઃ ।
લક્ષ્યં સમભ્યસેદ્ધ્વાન્તે શબ્દવ્યધનહેતવે ॥ ૧૬૧॥ 1875
તતો બાણેન હન્યાત્તદવધાનેન તીક્ષ્ણધીઃ ।
એતચ્ચ દુષ્કરં કર્મ ભાગ્યૈઃ કસ્યાપિ સિદ્ધ્યતિ ॥ ૧૬૨॥ 1876
એવં શ્રમવિધિં કુર્યાદ્ધાવત્સિદ્ધિઃ પ્રજાયતે ।
શ્રમે સિદ્ધે ચ વર્ષાસુ નૈવ ગ્રાહ્યં ધનુઃ કરે ॥ ૧૬૩॥ 1877
પૂર્વાભ્યાસસ્ય શસ્ત્રાણામવિસ્મરણહેતવે ।
માસદ્વયં શ્રમં કુર્યાત્પ્રતિવર્ષં શરદૃતૌ ॥ ૧૬૪॥ 1878
જાતે વાશ્વયુજે માસિ નક્મીદેવતાદિને ।
પૂજયેદીશ્વરં ચણ્ડીં ગુરું શસ્ત્રાણિ વાજિનઃ ॥ ૧૬૫॥ 1879
વિપ્રેભ્યો દક્ષિણાં દત્ત્વા કુમારી ભોજયેત્તતઃ ।
દેવ્યૈ પશુવલિં દત્ત્વા હૃષ્ટો વાદિત્રમઙ્ગલૈઃ ॥ ૧૬૬॥ 1880
તતસ્તુ સાધયેન્મન્ત્રાન્વેદોક્તાંશ્ચાગમોદિતાન્ ।
અસ્ત્રાણાં કર્મસિદ્ધ્યર્થં જપહોમવિધાનતઃ ॥ ૧૬૭॥ 1881

બ્રાહ્મં નારાયણં શૈવમૈન્દ્રં વાયવ્યવારુણે ।
આગ્નેયં ચાપરાસ્ત્રાણિ ગુરુદત્તાનિ સાધયેત્ ॥ ૧૬૮॥ 1882
મનોવાક્કર્મભિર્ભાવ્યં લબ્ધાસ્ત્રેણ શુચિષ્મતા ।
અપાત્રમસમર્થં ચ ધ્રત્યસ્ત્રાણિ કુપૂરુષમ્ ॥ ૧૬૯॥ 1883
પ્રયોગં ચોપસંહારં યો વેત્તિ સ ધનુર્ધરઃ ।
સામાન્યે કર્મણિ પ્રાજ્ઞો નૈવાસ્ત્રાણિ પ્રયોજયેત્ ॥ ૧૭૦॥ 1884
હસ્તાર્કે લાઙ્ગલીકન્દં ગૃહીત્વા તસ્ય લેપતઃ ।
શૂરસ્યાપિ રણે પુંસો દર્પં હરતિ સત્વરઃ ॥ ૧૭૧॥ 1885
ગૃહીતં યોગનક્ષત્રૈરપામાર્ગસ્ય મૂલકમ્ ।
લેપમાત્રેણ વીરાણાં સર્વશસ્ત્રનિવારણમ્ ॥ ૧૭૨॥ 1886
અધઃપુષ્પી શઙ્ખપુષ્પી લજ્જાલુર્ગિરિકર્ણિકા ।
નીલિની સહદેવા ચ પુત્રમાર્જારિકા તથા ॥ ૧૭૩॥ 1887
વિષ્ણુક્રાન્તા ચ સર્વાસાં જટા ગ્રાહ્યા રવેર્દિને ।
બધ્દ્વા ભુજે વિલેપાદ્વા કાયે શસ્ત્રૌઘવારિકા ॥ ૧૭૪॥ 1888
સર્પવ્યાઘ્રાદિસત્ત્વાનાં ભૂતાદીનાં ન જાયતે ।
ભીતિસ્તસ્ય સ્થિતા યસ્ય માતરોઽષ્ટૌ શરીરકે ॥ ૧૭૫॥ 1889
ગૃહીતં હસ્તનક્ષત્રે ચૂર્ણં છુચ્છુન્દરીભવમ્ ।
તત્પ્રભાવાદ્ગજઃ પુંસઃ સંમુખો નૈતિ નિશ્ચિતમ્ ॥ ૧૭૬॥ 1890
છુચ્છુન્દરી શ્રીફલપુષ્પચૂર્ણૈ-
રાલિપ્તગાત્રસ્ય નરસ્ય દૂરાત્ ।
આઘ્રાય ગન્ધં દ્વિરદોઽતિમત્તો
મદં ત્યજેત્કેસરિણો યથોગ્રમ્ ॥ ૧૭૭॥ 1891
શ્વેતાદ્રિકર્ણિકામૂલં પાણિસ્થં વારયેદ્ગજમ્ ।
શ્વેતકણ્ટારિકામૂલં વ્યાઘ્રાદીનાં ભયં હરેત્ ॥ ૧૭૮॥ 1892
પુષ્યાર્કોત્પાટિતે મૂલે પાઠાયા મુખસંસ્થિતે ।
દેહે સ્ફુટતિ નો તીક્ષ્ણં મણ્ડલાગ્રં રણે નૃણામ્ ॥ ૧૭૯॥ 1893
ગન્ધાર્યા ઉત્તરં મૂલં મુખસ્થં સંમુખાગતમ્ ।
શસ્ત્રૌઘં વારયત્યેવ પુષ્યાર્કે વિધિના ધૃતમ્ ॥ ૧૮૦॥ 1894
શુભ્રાયાઃ શરપુઙ્ખાયા જટાનીલીજટાથવા ।
ભુજે શિરસિ વક્ત્રે વા સ્થિતા શસ્ત્રનિવારિકા । 1895
ભૂપાહિચૌરભીતિઘ્ની ગૃહીતા પુષ્યભાસ્કરે ॥ ૧૮૧। ।
પ્રથમં ક્રિયતે સ્નાનં શુક્લવસ્ત્રાવૃતો ભવેત્ ।

મઙ્ગલ્યગીતસંયુક્તો દેવવિપ્રાંશ્ચ પૂજયેત્ ॥ ૧૮૨॥ 1896
ક્ષેત્રપાલસ્ય નામ્ના ચ બલિં દદ્યાદ્દિશો દશ ।
શસ્ત્રાણિ ચાપિ સંપૂજ્ય રક્ષામન્ત્રં સ્મરેત્તતઃ ॥ ૧૮૩॥ 1897
ૐ શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટાસ્વનેન નઃ પાહિ ચાપજ્યાનિઃસ્વનેન ચ ॥ ૧૮૪॥ 1898
પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાં તથેશ્વરિ ॥ ૧૮૫॥ 1899
સૌમ્યાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।
યાનિ ચાત્યન્તઘોરાણિ તૈ રક્ષાસ્માંસ્તથા ભુવમ્ ॥ ૧૮૬॥ 1900
ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાણિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્ રક્ષ સર્વતઃ ॥ ૧૮૭॥ 1901
દિવ્યૌષધીનાં લેપં ચ રક્ષાબન્ધં ચ કારયેત્ ।
કિંચિદ્ ભુક્ત્વા ચ પીત્વા ચ તતઃ સંનાહમાચરેત્ ॥ ૧૮૮॥ 1902
સેનાપતિં ગજારોહાનન્યાંશ્ચ સુભટાંસ્તથા ।
મુખ્યાનન્યાનપિ ધનૈર્વસ્ત્રૈશ્ચ પરિતોષયેત્ ॥ ૧૮૯॥ 1903
પૂર્વં સારથિમારોપ્ય રથે સજ્જેત્તતઃ સ્વયમ્ ।
યોજયેદ્વાજિનઃ શુદ્ધાન્સુસંતુષ્ટાઞ્જિતશ્રમાન્ ॥ ૧૯૦॥ 1904
રથે ચ ધારયેદ્ ભદ્રં કાર્મુકાણાં ચતુષ્ટયમ્ ।
ચતુઃશતાનિ બાણાનાં તૂણીરે ચ પ્રયોજયેત્ ॥ ૧૯૧॥ 1905
ખડ્ગં ચર્મ ગદાં શક્તિં પરિઘં મુદ્ગરં તથા ।
નારાચં પરશું કુન્તં પટ્ટિશાદીંશ્ચ ધારયેત્ ॥ ૧૯૨॥ 1906
ન રથા ન ગજા યસ્ય સોઽશ્વમેવ સમારુહેત્ ।
કટિબદ્ધૈકતૂણીરઃ ખડ્ગશક્તિધનુર્યુતઃ ॥ ૧૯૩॥ 1907
તતોર્જુનસ્ય નામાનિ વિષ્ણુસ્મરણપૂર્વકમ્ ।
જપેત્તતઃ પ્રતિષ્ઠેત ચતુરઙ્ગબલૈર્યુતઃ ॥ ૧૯૪॥ 1908
લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાજયઃ ।
યેષામિન્દીવરશ્યામો હૃદયસ્થો જનાર્દનઃ ॥ ૧૯૫॥ 1909
અર્જુનઃ ફાલ્ગુનઃ પાર્થઃ કિરીટી શ્વેતવાહનઃ ।
બીભત્સુર્વિજયી કૃષ્ણઃ સવ્યસાચી ધનંજયઃ ॥ ૧૯૬॥ 1910
ખં તથા સ્વરવસ્વિન્દુનેત્રૈરક્ષૌહિણી મતા ।
અક્ષૌહિણ્યાં સંપ્રદિષ્ટા રથાનાં વર્મધારિણામ્ । 1911
સંખ્યા ગણિતતત્ત્વજ્ઞૈઃ સહસ્રાણ્યેકવિંશતિઃ ॥ ૧૯૭। ।

ઉપર્યષ્ટૌ શતાન્યાહુસ્તથા ભૂયશ્ચ સપ્તતિઃ ।
ગજાનાં તુ પરીમાણમેતદેવ વિનિર્દિશેત્ ॥ ૧૯૮॥ 1912
જ્ઞેયં લક્ષં પદાતીનાં સહસ્રાણિ તથા નવ ।
શતાનિ ત્રીણિ પઞ્ચાશચ્છૂરાણાં શસ્ત્રધારિણામ્ ॥ ૧૯૯॥ 1913
પઞ્ચષષ્ટિસહસ્રાણિ તથાશ્વાનાં શતાનિ ચ ।
દશોત્તરાણિ ષટ્ પ્રાહુઃ સંખ્યાતત્ત્વવિદો જનાઃ ॥ ૨૦૦॥ 1914
ખદ્વયં નિધિવેદાક્ષિચન્દ્રાક્ષ્યગ્નિહિમાંશુભિઃ ।
મહાક્ષૌહિણિકા પ્રોક્તા સંખ્યા ગણિતકોવિદૈઃ ॥ ૨૦૧॥ 1915
કોટયસ્ત્રયોદશ પ્રોક્તા લક્ષાણામેકવિંશતિઃ ।
ચતુર્વિંશત્સહસ્રાણિ તથા નવશતાનિ ચ ॥ ૨૦૨॥ 1916
મહાક્ષૌહિણિકાં પ્રાહુરિમાં તત્ત્વવિદો જનાઃ ।
મહાક્ષૌહિણિકાયાં તુ રથાઃ કોટિમિતાઃ સ્મૃતાઃ । 1917
સપ્તત્રિંશચ્ચ લક્ષાણિ ગીયન્તે તત્ત્વભેદિભિઃ ॥ ૨૦૩। ।
દ્વાદશૈવ સહસ્રાણિ ચત્વાર્યેવ શતાનિ ચ ।
પ્રોક્તાનિ નવતિસ્તદ્વદેવમેવ મતંગજાઃ ॥ ૨૦૪॥ 1918
અશ્વાશ્ચતુષ્કોટિમિતા લક્ષાણ્યેકાદશૈવ ચ ।
સપ્તત્રિંશત્સહસ્રાણિ તથા શતચતુષ્ટયમ્ ॥ ૨૦૫॥ 1919
સપ્તતિશ્ચૈવ સંખ્યાતાઃ પ્રોચ્યન્તે પત્તયસ્તતઃ ।
ષટ્કોટયોડશીતિલક્ષાણિ પઞ્ચાધિકમિતાનિ ચ ॥ ૨૦૬॥ 1920
દ્વિષષ્ટિ ચ સહસ્રાણિ તથા શતચતુષ્ટયમ્ ।
પઞ્ચાશદિતિ સંખ્યાતા મહાક્ષૌહિણિકા બુધૈઃ ॥ ૨૦૭॥ 1921
મુખે રથા ગજાઃ પૃષ્ઠે તત્પૃષ્ઠે ચ પદાતયઃ ।
પાર્શ્વયોશ્ચ હયાઃ કાર્યા વ્યૂહસ્યાયં વિધિઃ સ્મૃતઃ ॥ ૨૦૮॥ 1922
અર્ધચન્દ્રં ચ ચક્રં ચ શકટં મકરં તથા ।
કમલં શ્રેણિકાં ગુલ્મં વ્યૂહાનેવં પ્રકલ્પયેત્ ॥ ૨૦૯॥ 1923
યે રાજપુત્રાઃ સામન્તા આપ્તાઃ સેવકજાતયઃ ।
તાન્સર્વાનાત્મનઃ પાર્શ્વે રક્ષાર્થે સ્થાપયેન્નૃપઃ ॥ ૨૧૦॥ 1924
યસ્મિન્કુલે યઃ પુરુષઃ પ્રધાનઃ
સ સર્વયત્નેન હિ રક્ષણીયઃ ।
તસ્મિન્વિનષ્ટે કિલ સારભૂતે
ન નાભિભઙ્ગે હ્યરકા વહન્તિ ॥ ૨૧૧॥ 1925
ક્ષત્રસારભૃતં શૂરં શસ્ત્રજ્ઞમનુરાગિ ચેત્ ।

અપિ સ્વલ્પં શ્રિયે સૈન્યં વૃથેયં મુણ્ડમણ્ડલી ॥ ૨૧૨॥ 1926
અપિ પઞ્ચશતં શૂરા મૃદ્નન્તિ મહતીં ચમૂમ્ ।
અથવા પઞ્ચ ષટ્ સપ્ત વિજયન્તેઽનિવર્તિનઃ ॥ ૨૧૩॥ 1927
ધનુઃસંગતિસંશુદ્ધા વાજિનો મુખદુર્બલાઃ ।
આકર્ણપલિતા યોધાઃ સંગ્રામે જયવાદિનઃ ॥ ૨૧૪॥ 1928
પરસ્પરાનુરક્તા યે યોધાઃ શાર્ઙ્ગધનુર્ધરાઃ ।
યુદ્ધજ્ઞાસ્તુરગારૂઢાસ્તે જયન્તિ રણે રિપૂન્ ॥ ૨૧૫॥ 1929
એકઃ કાપુરુષો દીર્ણો દારયેન્મહતીં ચમૂમ્ ।
તં દીર્ણમનુ દીર્યન્તે યોધાઃ શૂરતમા અપિ ॥ ૨૧૬॥ 1930
દુર્નિવારતરા ચૈવ પ્રભગ્ના મહતી ચમૂઃ ।
અપામિવ મહાવેગત્રસ્તા મૃગગણા ઇવ ॥ ૨૧૭॥ 1931
યસ્તુ ભગ્નેષુ સૈન્યેષુ વિદ્રુતેષુ નિવર્તતે ।
પદે પદેઽશ્વમેધસ્ય લભતે ફલમક્ષયમ્ ॥ ૨૧૮॥ 1932
દ્વાવિમૌ પુરુષૌ લોકે સૂર્યમણ્ડલભેદિનૌ ।
પરિવ્રાડ્ યોગયુક્તશ્ચ રણે ચાભિમુખો હતઃ ॥ ૨૧૯॥ 1933
યત્ર યત્ર હતઃ શૂરઃ શત્રુભિઃ પરિવેષ્ટિતઃ ।
અક્ષયં લભતે લોકં યદિ ક્લીબં ન ભાષતે ॥ ૨૨૦॥ 1934
મૂર્છિતં નૈવ વિકલં નાશસ્ત્રં નાન્યયોધિનમ્ ।
પલાયમાનં શરણં ગતં ચૈવ ન હિંસયેત્ ॥ ૨૨૧॥ 1935
ભીરુઃ પલાયમાનોઽપિ નાન્વેષ્ટવ્યો બલીયસા ।
કદાચિચ્છૂરતાં યાતિ મરણે કૃતનિશ્ચયઃ ॥ ૨૨૨॥ 1936
સંભૃત્ય મહતીં સેનાં ચતુરઙ્ગાં મહીપતિઃ ।
વ્યૂહયિત્વાગ્રતઃ શૂરાન્સ્થાપયેજ્જયલિપ્સયા ॥ ૨૨૩॥ 1937
અલ્પાયાં વા મહત્યાં વા સેનાયામિતિ નિશ્ચયઃ ।
હર્ષો યોધગણસ્યૈકો જયલક્ષણમુચ્યતે ॥ ૨૨૪॥ 1938
અન્વેતં વાયવો યાન્તિ પૃષ્ઠે ભાનુર્વયાંસિ ચ ।
અનુપ્લવન્તે મેઘાશ્ચ યસ્ય તસ્ય રણે જયઃ ॥ ૨૨૫॥ 1939
અપૂર્ણે નૈવ મર્તવ્યં સંપૂર્ણે નૈવ જીવતિ ।
તસ્માદ્ધૈર્યં વિધાતવ્યં હન્તવ્યા પરવાહિની ॥ ૨૨૬॥ 1940
જિતે લક્ષ્મીર્મૃતે સ્વર્ગઃ કીર્તિશ્ચ ધરણીતલે ।
તસ્માદ્ધૈર્યં વિધાતવ્યં હન્તવ્યા પરવાહિની ॥ ૨૨૭॥ 1941
એતમ્ શિવધનુર્વેદસ્ય ભગવતો વ્યાસસ્ય ચ ।

Encoded and proofread by Ravi Mahadevappa ravi@ece.neu.edu
(Assisted by Avinash Sathaye sohum@ms.uky.edu)

The numerals correspond to English translation available at
http://www.atarn.org/india/dhanurveda_engtm

*dhanurveda*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*